विश्वनाथ खैरे

# ? का माता ?

**आकाशवाणी-संस्कृत-नाटकस्पर्धायां**
**पारितोषिकविजयि नाटकम् ।**

**संमत**

का माता ।
संमत प्रकाशन १२
प्रथमावृत्तिः २००१

आकाशवाणी-संस्कृतनाटक-स्पर्धायां पारितोषिकम् – ख्रि. २००१ ।

प्रकाशक : उमादेवी खैरे

संमत प्रकाशन, ३७४ सिंध सोसायटी, औंध, पुणे ४११००७

मुद्रक : प्रवीण प्रिंटिंग सर्व्हिसेस
'आसावरी', औंध, पुणे ४११००७

मूल्यम् : १० रूप्यकाणी ।

विश्वनाथ खैरे

# का माता ।

**संमत**

**समर्पणम् ।**

‘चिकित्सका’य बुद्ध-तुकाराम-भक्ताय

आकाशवाणी संस्कृतिमन्दिरं करिष्यमाणाय

**‘पुरुषोत्तम मंगेश लाड’** महोदयाय ।

## भूमिका ।

महाभारतं नाम संस्कृतिकथानामाकरग्रन्थः। भासकालिदासादिभ्य आरभ्य भारतीय ज्ञानपीठसंमानितानामपि स्फूर्तिकारणानि कथानकानि अस्मिन् महाकाव्ये सन्ति । न केवलं संस्कृतभाषायां, सर्वासु भारतीयलोकभाषास्वपि महाभारतीयपात्राणि नाट्यकृतीनां कारणीभूतानि दृश्यन्ते । कविकुलगुरुमनुसृत्य स्वरुचिमनु मूलकथायामीषदधिकं वा परिवर्तनं कवयः क्षम्यमामनन्ति । साधारणतया तु पात्राणां मूलकथागतानि चरितान्येव वर्ण्यन्ते नवीनास्वपि कृतिषु ।

१९७२ ख्रिस्ताब्दे 'एकलव्य' नामकं मराठीनाटकं मया लिखितम् । तस्मिन् विमृष्टा न केवला निषादपुत्रस्य गुरुभक्तिः, अपि तु क्षत्रनिषादयोः भेदविरोधाःप्रवृत्त्यां, नीत्यां, ज्ञानसम्पादने, ज्ञानविनियोगे च । महाराष्ट्रराज्यस्य पुरस्कारेण, 'महाराष्ट्रभूषण पु ल देशपांडे' महोदयैः स्वप्रियाणां ७५ पुस्तकेषु तस्यान्तर्भावतश्च तद् विदुषां परितोषकारि सिद्धं जातम्। १९७३ ख्रिस्ताब्दे 'वंशाचा व्यास (वंशस्य व्यासः।)' इत्यपरे नाटके धृतराष्ट्र-पाण्डु-जननो व्यासकृतनियोग-प्रसंगः सामाजिकदृष्ट्या निरीक्षतः, तदभिभावितस्त्रीणां मनोमन्थनेन चापूरितः । 'वंशस्य व्यासो मनुष्यः' इति च वेदव्यासस्याभिमतं तस्मिन् प्रकाशितम् ।

कर्णचरितकथाया विशिष्टविश्लेषणेन नाट्यकृतिरचनाया आकाक्षा १९९९ ख्रिस्ताब्दे घोषितया आकाशवाणी-नाटक-स्पर्धया सम्पूरिता । स्पर्धायां पारितोषिकप्रापणेन नवसहस्राब्दोचिता सामाजिकी भूमिकैव तस्य समुत्थापितेति मन्ये । पुरुषाणां स्वीयधारणाः सामाजिकनीतयश्च स्त्रीणां मनांसि विदारयन्ति, तासामुपरि अस्वाभाविकानि कर्माणि समारोपयन्ति, तासां भावभावना अविचारणीयाः कुर्वन्ति, मातृत्वभावं चापि निर्दलन्ति – इति सर्वमिदं महाभारतकथासु निगूढमपि सत्यं कुन्तीकृष्णयोः कुन्तीराधयोश्च संवादैरस्मिन् नाटके प्रतीतं भूयात् । महाभारतकथानां, विशेषवस्तु कर्णकथायाः सार्वभारतिकावाहनसामर्थ्यात्, भारतीयभाषास्वन्यास्वपि तस्य अनुवादा रोचका बोधकाश्च भविष्यन्ति, आकाशवाण्यां तेषां श्रावप्रयोगा रसिकप्रियाश्च संपत्स्यन्ते इति विश्वस्यते । ततश्च प्रतीकरूपेण सर्वेषां प्रतिनिधिभूतेभ्य आकाशवाण्या आद्यधुरीणेभ्यः 'पु मं लाड' महोदयेभ्यः सादरं समर्प्यते ।

## का माता ।

[संध्यासमये कोटराणि गन्तुं त्वरमाणानां पक्षिसंघानां किलकिलरवाः श्रूयन्ते । राजप्रासादे दासदासीनां, रभसा दीपदीपिका द्योतयतां ध्वनयः । धातुमयो दीपो भूमौ निपत्य ठण्ठणायते । 'अरे किं स्वस्थ आसीनः?' 'अयि धूपिके, कुत्र वा वर्त्तिरस्य दीपस्य?' इत्यादयो ध्वनयः । घण्टानादः । कोलाहलेऽस्मिन श्रूयन्ते वेगेन धावतो दूतस्य पदाघाताः ।]

**दूतः –** देव्यै कुन्तीमात्रे निवेदयत । महाराजयुधिष्ठिरेण प्रेषितोऽस्मि । अत्यन्तमानन्ददायिनी वार्ता । देव्यै श्रावयिष्ये । अयि गच्छ .. ।

[उच्चैर्भाषितमेतत् श्रुत्वा स्वयं कुन्ती अन्तर्गृहात् निर्गत्य उपस्थिता । दासीद्वयस्य 'इत इतो देवी' इति उद्गाराः ।]

**दूतः –** जयतु महादेवी ।

**कुन्ती –** चिरं जीव ।

**दूतः –** अस्मि देवेन प्रेषितः शिबिरात् । युद्धस्य सर्वोत्तमां वार्तां निवेदयितुम् ।

**कुन्ती –** निवेदय ।

**दूतः –** हतः कर्णः ।

[दासदासीनां हर्षोल्लसितो जयघोषः । 'जयो देव्यै । जयो देवाय ।'..]

**कुन्ती –** शान्तम् । .. न सुष्ठु श्रुतम् । किं कथितं, दूत ?

**दूतः** (हर्षोनगंभीरस्वरे) **–** देवि, अद्य युद्धे महाराजेन अर्जुनेन कौरवसेनानी कर्णो निहतः ।

**कुन्ती** (शुष्कस्वरेण) **–** कर्णो निहतः । (निःश्वसिति ।.. सेवकेषु निःस्तब्धेषु, अन्तर्गृहं प्रति निष्क्रमति । चतुष्पञ्च पदानि गत्वा मुखं परिवृत्य) दूत, प्राप्ता वार्ता । सेवक, अस्मै उपहारो दीयताम् । दूत, कथितव्यस्त्वया कृष्णः, माता त्वां इहागतं इच्छतीति । (झटिति निष्क्रान्ता ।)

[सेवकसेविकाः मन्दपदैः नित्यकर्माणि कर्तुं गच्छन्ति ।]

**कुन्ती** (अन्तर्गृहस्य द्वारं फट् शब्दपूर्वकं पिदधाति । सगद्गदम्) **–** कर्णो निहतः । कर्णो निहतः । युद्धस्य सर्वोत्तमा वार्ता । सर्वोत्तमा ?.. हा सुत, हतोऽसि भ्रात्रा । हा कर्ण, हा पुत्रक, को मां श्रूयात् । न त्वं, जन्मनो जनन्या त्यक्तः, जन्मान्ते बन्धुना हतः । नान्ये मे पुत्रास् त्वमिव देवैर्येऽपि दत्ताः पत्युर्वशार्थम् । न कौरवास्तव स्वामिनः, येषामहमरिप्रसूरेव मता । अहमेवैकाकिनी, पुत्रक, या त्वां प्रत्यहं स्मरन्ती वार्धक्यमुपायाता । यदा यदा मे पुत्राः सञ्जाता, धर्मेंद्रवाय्वश्विनैर्दता, स्मृतवत्यहं त्वामेव नवजातम् । दृष्टवती च यदि तेषु कस्यचित् कवचं सर्वरक्षकम्। न तेषां, केवलं तव ।.. आत्मनो नवीने वयसि, नाजानि किं करवाणि । धात्र्येव मे विश्वासिनी । कन्यायाः मातृत्वादधिकतरं कुलस्य कीर्तेः सुरक्षिणी । तयाऽदिष्टं मया कृतम् । क्षमस्व पुत्रक, क्षमस्व माम् । (निःश्वसिति।) कथं क्षमिष्यसे ? किं कृतं मया त्वदर्थं येन क्षमाभाजनं ते भवामि । सर्वदा मया पुत्रक, स्वसंमानार्थं कुलगौरवार्थं वा बलीकृतस् त्वं एव ।

लोके सूत इति ज्ञातो भर्त्सनां त्वं पदे पदे
मामकैरप्यान्वभवस्तदाऽहं मूकवत् स्थिता ।
सूर्यतेजस्विनस्त्वत्तस्तेषामेवाभयाय ह
याचितस्त्वं तदाऽप्येनां अदा आश्वासनं महत् ।
तदर्थमेव चाद्य त्वं प्राणांस् त्यक्त्वा रणेशयः ।
करोमि किमहं येन स्यामीषदपि तेऽनृणा ।

[द्वारे खटखटायनध्वनिः । सेवकश्च निवेदयति : 'देवि, आज्ञप्तोऽस्मि भगवता श्रीकृष्णेन । आगमिष्ये प्रहररात्रौ ।']

**कुन्ती** (आत्मानं व्यवस्थाप्य) **–** अस्तु । न मेऽधुना भोजने रुचिः । न द्वारमुद्घाटनीयं श्रीकृष्णस्यागमनात् प्राक् ।
[कालो गच्छति । द्वारात् बहिः कतिपयपदानां चलनारवः । 'इत इतो भगवत्' इति शब्दः पुनःपुनः । कुन्ती स्वीयासनादुत्थाय निःश्वासपूर्वकं द्वारं अपिधाति ।]

**कृष्णः –** देवि, वन्दे । क्षमस्व विलंबम् । अशक्यमेवासीत् उत्सवहर्षोल्लासं परित्यज्य निर्गमनम् ।

**कुन्ती** (सविषादम्) **–** जाने । दूतसन्देशादेव तर्कायितं मया ।

आत्मनः प्राणदानेन परेषां शक्त उत्सवः
तस्यार्थे शुच्यते केन वद कृष्ण मदन्वयिन् ।

**कृष्णः –** भाग्यं पाण्डुकुलस्येतत्, सुखे दुःखं सुखं दुःखे, मन्यन्ते पुरुषाः स्त्रियः ।

**कुन्ती –** कृष्ण,

दक्षिणे नयने सुखं वामे दुःखं यदा भवेत्
किं कर्तव्यं निवेदय भागधेय-विचारक ।

**कृष्णः –** पश्यन्तेव जना विश्वं सुखदुःखयुताक्षिणः
विचारितव्यः कालोऽपि न भाग्यं केवलं बुधैः

**कुन्ती –** बाल्यात् प्रभृति दुःखानि दुःखान्येव सहे यथा
असमर्थाऽस्मि जाताऽहं कालौचित्यविचारणे ।

**कृष्णः –** श्रूयतां देवि । कर्णस्यार्थे दुःखदर्शनाय नायमुचितः कालः । युद्धसमाप्तिपर्यन्तं यः कोऽपि कौरवाणां पक्षे यत्किञ्चिदपि साह्यं कुर्यात् स शत्रुरेव पाण्डवानां, मातुश्चापि तेषाम् । युद्धान्ते गतिप्राप्तानां उदकदानं कर्तव्यं युधिष्ठिरेण । सर्वेषामरिमित्राणां कृते शोकशान्तितर्पणानि तदा समाचरणीयानि । अद्य तु कर्णवध –

**कुन्ती –** वधः ? कर्णवधः?

**कृष्णः –** अद्य कर्णवधदिने पाण्डवानां पक्षे हर्षोल्लसितमेव संपत्स्यते ।

**कुन्ती –** सन्तर्पणं तु अमूर्तव्यक्तेः । जीवन्तमजीवन्तं वा, व्यक्तकायं संदृश्य च संबोध्य च, समाधानं मातुरधिकं भवेत् ।

**कृष्णः –** यदि एवं, गच्छतु भवती रणभूमिम् । पश्यतु भवती तं शोच्यं, देहिना वियुक्तं देहम् ।

**कुन्ती –** गच्छामि सद्य एव ।

**कृष्णः –** गन्तव्यं सद्य एव । न त्वेकाकिन्या । मया सह यास्यसि ।

**कुन्ती –** यथा गताऽऽ समेकदा तं जीवन्तम् । हा दैव ।

[श्रूयन्ते : रात्रिंचराणां कीटानां पतङ्गानां च किर्कीरिति रवाः । यत्रतत्र च शृगालानामारटनम् । श्वानानां भूभूःकाररुदितम् ।
ततश्च मानुषाः पदरवाः । क्वचित् च तेषां स्खलनस्य ध्वनिः । निःस्वनं निगदन् कृष्णः कुन्त्यै मार्गं सूचयति । तौ कथमपि दशपञ्चपलमात्रं प्रचलतः । विद्धानां आसन्नमृतानां उद्गाराः 'अम्ब । हाः हाः । जलम्।' इत्यादयः । अश्वानां गजानां च रुदितानि । तथैव वन्यानां शवभक्षिणां हर्ष-अमर्ष-कलहानां शब्दाः । इयं कुरुक्षेत्ररणभूमिः । गतासुवीरस्य कस्यचित् शवं कुन्तीमवपातपति । सा चीत्कारयति ।]

**कुन्ती –** कृष्ण ।

**कृष्णः –** शान्तम् । मा बिभेहि । उत्तिष्ठ । न आहताऽसि मन्ये ।

**कुन्ती –** न काये । तीक्ष्णं मनसि ।

**कृष्णः –** ननु संग्रामोत्तरा रणभूमिरियम् । स्वर्गंगतात्मनां शवानि, काडानीव शस्यानां लूनानि, भूमौ विकीर्णानि।

**कुन्ती** (विषण्णा) **–** इयं मरणभूमिर्न रणभूमिः ।

**कृष्णः –** दिष्ट्या न पश्यसि शतांशमपि तस्या, दीपिकामपि ग्रसमाने तमसि ।

**कुन्ती –** अदृष्टं यदेकं हि शवं स्पृष्टं, तदलं तमस्करणे मनसः ।
कियन्ती मातरः कृष्ण रुदान्ति व्यथिताऽधुना
यदि पश्यन्ति प्रत्यक्षं संहारं ता भयंकरम् । -

**कृष्णः –** नराणां दूषणं दद्युः । अतएव ताः सुरक्षिताः स्थीयन्ते गृहेषु, न कल्पनायामपि मन्तव्या स्त्रीभिः कामनानां परिणतिरिति ।

**कुन्ती –** स्त्रीणामेव कामनानाम् ? न पुरुषाणाम्?

**कृष्णः –** अत्तिके, पुरुषा दासा, न स्वामिनः स्त्रीणाम् । स्वामिनीनां कामनाः पूरयितुं युगान्तकं संगरमपि विनोदनमिव मन्यन्ते ते तासाम् ।

**कुन्ती –** नहि नहि कृष्ण । न ऋतं भाषसे । वयं स्त्रियो, दशमासपर्यंतं धारयामो गर्भान्, वेदनापूर्वकं जनयामो बालान्, उरसः पाय्य वर्धयामः शिशून, तेषामेव कृते व्यतीयाम आयुषम् । पुरुषा निमित्तमात्रम् । नास्माकं दासा न प्रजानां परिपालकाः ।

**कृष्णः –** ते तु मन्यन्ते आत्मानं, विश्वस्य परिपालने नियुक्तम् । परिपालकश्च सर्वथा समर्थयते क्रियाकलापमात्मनः – अमुकस्य हिताय अमुकाया वा प्रियं कर्तुम् । अयमपि संपद्यमानः संहारः स्त्रिय एवैकस्या अपमानप्रतिशोधार्थं, न वा ?

**कुन्ती –** पुरुषाणां द्यूतलिप्सायाः फलमिदम् । अस्तु । दिशा मार्गं, मात्रे, कतिपयवर्षोत्तरमपि पुत्रकं द्रष्टुकामायै ।

**कृष्णः –** अन्यतरेण स्वपुत्रेण हताहतम् –

**कुन्ती –** कृष्ण, -

**कृष्णः –** आम्, कुन्ति अत्तिके ।

**कुन्ती –** अत्तिके, अत्तिके..? न मातर् यथानित्यम ?

**कृष्णः –** ननु पितुःष्वसा मे त्वम् ?

**कुन्ती** (सविषादम्) **–** यथा जाता । न यथा संवर्धिता ।.. यत्र च संविर्धिता, शैशवात् सद्य एव मातृत्वे क्षिप्ता ।

**कृष्णः –** न किम् अहं तत् जाने ।

**कुन्ती –** तथापि नाह्वयसि मां मातर् इति अद्यैव ।

**कृष्णः –** कुरुकुलमहिषि, पञ्चपाण्डवानां अम्बे,..

**कुन्ती –** अलं छद्मना । त्वं तु विश्वासभाजन एकतः, प्रतिश्वासं छलशब्दकूजन इतरतः । मध्ये रात्रे, रणेऽस्मिन् मरणरत्ञ्जिते चलती, नेयं महिषी कुन्ती.. कृष्ण.. (अवरुद्धकण्ठा वक्तुमसमर्था विरमति ।)

**कृष्णः –** अत्तिके, कतिपयघटिकापूर्वं वाक्शरैरहं, प्राणहरशरैश्च धनंजयस्ते पुत्रः, स्वर्गं यं प्रेषितुं प्रवर्तितौ, तं द्रष्टुं चलती..

**कुन्ती** (सपदि) **–** अहं तस्य माता ।

**कृष्णः –** जननी ।

**कुन्ती –** कृष्ण, मय्यपि प्रयोजयसि वाक्शरान् । किमर्थं तस्मिन् प्रयुक्तास्ते त्वया ।

**कृष्णः** (हसति।) **–** यन्मया न धारयितव्यम् वास्तवं शस्त्रम् । वागवे मे शस्त्रं शेषम् । आचार्यादिनाम प्रेम्णा यदि पाण्डववीरो 'न योत्स्य' इत्युक्त्वा, धनुषं त्यक्त्वा, रथोपस्थ उपविशति, वागेव मे तं प्रबोधयति । यदि कौरवपक्षी कश्चित् धर्माधर्मं चर्चयितुं प्रवर्तते, वागेव मे तव पुत्राणां परित्राणाय मुखरीभवति ।

**कुन्ती –** रणस्थाने धर्माधर्माणां चर्चा ?

**कृष्णः –** साधूनां दुष्कृतां चापि धर्म एव शरणं चरमं, प्राप्तायां विपदि । पूर्वकर्मपरिपाकाद् यदा हि तस्य रथचक्रं भूमिग्रस्तं, स्मृतो विस्मृतस् तस्यापि धर्मः । 'हे धर्मयोधा अर्जुन, मा मा वर्षय बाणान्, चक्रमुद्धरति रथिनि ।' एवमाक्रोशतस्तस्य मयाऽपि श्रावयितो धर्मः ।

**कुन्ती –** किं नु खलु कथितं त्वया ।

**कृष्णः –** जतगृहदाहादारभ्य पाञ्चालिकर्षणपर्यन्तं तस्य स्वामिनः कृत्यानि वर्णयित्वा-

**कुन्ती –** स्वामिनः कृत्यार्थं सेवकस्य दण्डः ?

**कृष्णः –** स्वामिना कृतोपकारः, स्वामिनो दुष्कर्मसु सहायश्च सेवको दण्डनीय एव भूयात् स्वामिनः कृत्यार्थम् ।

**कुन्ती –** न जाने राजसभाया न्यायम् । माता तु या मनसा स्थिरा, प्रसभं चिकित्सयति भेदप्रभेदं स्वकयोर्देवराण्याश्च पुत्रयोर्मध्ये । अस्तु । धर्माधर्मस्य किमुक्तं त्वया ।

**कृष्णः –** दुष्कृतानि तानि वर्णयित्वा मया स पृष्टः – तेदा क्वासीत् ते धर्मो, रे राधेय ?

**कुन्ती** (कंटकविद्धेव) **–** रे कृष्ण, राधेयऽ इति सम्बोधितस्त्वयाऽसौ?

**कृष्णः –** अथ किम् ।

**कुन्ती –** 'अथ किम्?' कर्णेति नाकर्णितं तस्य नाम त्वया ।

**कृष्णः –** राधेति नाकर्णितं सूतस्याधिरथस्य स्त्रियो नाम त्वया ?

**कुन्ती –** ननु त्वमेव दूतो भूत्वा कर्णं प्रति गत आसीः, तस्य ज्ञापयितुं, का वा तस्य नाभिनालबन्धना माता ।

**कृष्णः –** तेनैव द्विगुणः समर्थितो राधेयेति सम्बोधितुम् । सूतात् प्रत्यागतोऽहं दूतो, न ते समग्रं तदुक्तं श्रावयामासम् । यदीच्छसि, श्रुणु संप्रति –

[श्रूयतेऽथ कर्णकृष्णयोः संवादः ।]

**कर्णः –** किंनिमित्तमागतः सूतपुत्रं प्रति पाण्डवानां गुरुः कृष्णः ।

**कृष्णः –** निराकर्तुं निमित्तानि विपरीतानि ।

**कर्णः –** कथं नाम ।

**कृष्णः –** भ्रातृणां मनोमीलनेन ।

**कर्णः –** तद् गन्तव्यमासीत् शतपुत्रान् कुरूणाम् ।

**कृष्णः –** ते भ्रातृव्याः । भ्रातृव्या द्विषंदः सन्ति – इति श्रुतिः।

**कर्णः –** कथं जानातु श्रुतिं सूतपुत्रः ।

**कृष्णः –** श्रुतिर्नाम प्राचीनैरपि प्रोक्तो धर्मः ।

**कर्णः –** सूतानां तु प्रचलितः कुलधर्मः, कुटुम्बकमेव पितृपितृव्यानां भ्रातृभ्रातृव्यानां च मन्तव्यम् इति ।

**कृष्णः –** तदेव प्रोक्तं धर्मात्मना युधिष्ठिरेण –

अस्मासु विग्रहे जाते वयं पञ्च च ते शतम्
परैस्तु विग्रहे प्राप्ते वयं पञ्चाधिकं शतम् ।

**कर्णः –** (विहस्य) – अहो धर्मः । नायं धर्मो युधि स्थिरः । के परे के परस्परा न सुलभं बोद्धुम् ।

**कृष्णः –** नातिदुष्करम् । एकस्यैव मातुः पितुर्वा प्रजा, भ्रातृभगिनीभावबन्धना ।

**कर्णः –** तद् आवां वसुषेण-वृषसेनौ भ्रातरौ । युवां कृष्ण-बलरामौ यथा । युवां गोपालपुत्रौ । वसु-गो-सेवारतौ बाल्ये । श्रुतं च मया यद् आगामिनि युद्धे भवान् अर्जुनस्य सारथिर्भविष्यति । सारथिः सूत एव । गोपालाश्च सूतप्रायाः । इदानीमवगतम् । मां प्राप्तो भवान् सूतपुत्राणां भ्रातृभावं वर्धयितुं प्रयतमानः ।

**कृष्णः –** को न जानाति कर्णस्य वसुषेणस्य बुद्धिचापल्यं, रणकौशल्यं चापि ।

**कर्णः –** मा मां उद्धतं करोतु स्तुतिः ।

**कृष्णः –** नैषा स्तुतिः, सत्यं कथनम् । अहं तु कर्ण, देवकीवसुदेवयोर्जातो राजपुत्रो, न गोपालपुत्रकः । तेन हि, न मे भ्रातृबंधस्त्वया सह शक्यो भवेत् – अपि सूतस्य तव भवतः ।

**कर्णः –** अपि सूतस्य मम भवतः ? तत्र किं सन्देहो भवतः ?

**कृष्णः –** अलं सन्देहेन । न त्वं सूतपुत्रः ।

**कर्णः –** न ऋतं भाषसे कृष्ण । जानेऽहं तव कृष्णत्वम् ।

**कृष्णः –** मा एवम् । तथैव शुद्धं कृष्णत्वं तथा विशुद्धं शुक्लत्वं । मिश्रण संशयास्पदम् । विश्वसिहि मां हे कर्ण, जातोऽसि जन्मना क्षत्रः ।

**कर्णः –** सन्मित्रेणाभिषिक्तोऽहं अङ्गदेशस्य भूपतिः
तदलं मम क्षत्रत्वं न कांक्षे जन्मगौरवम् ।

**कृष्णः** जन्मना क्षत्रियत्वेन गौरवो द्विगुणस्तव
भ्रातृभ्रातृव्यसंघश्च शतादप्यधिको भवेत् ।

**कर्णः –** भ्रातरः शत मे प्राप्ता, भ्रातृव्यान् यदि मन्यसे
तेषां ये पञ्च मे तेऽपि, किमन्यैः साध्यते मया ।

**कृष्णः –** सूतत्वं परिवर्तितं क्षत्रत्वे ते यथा भवेत्
भ्रातृभ्रातृव्याश्च तथा कर्ण स्युः परिवर्तिताः ।

**कर्णः** (साश्चर्यम्) – न जाने भाषासे कृष्ण, शठ किं विपरीतकृत्
कौरवाणां विनाशाय प्रतिभासि त्वमागतः ।

**कृष्णः** (स्मितं विहस्य) – कौरवाणां विनाशस्तु दैवेनैव नियोजितः

न कांक्षति विनाशं ते माता, भ्रात्रा तदागमः ।

**कर्णः –** न खलु वृषेण सह मे कलहः । न च मात्रा कथमप्यादिष्टः ।

**कृष्णः –** का ते माता ?

**कर्णः –** का मे माता ?

**कृष्णः –** न सा यां प्रमादेन, न तव प्रमादेन, मातरं मन्यसे ।

**कर्णः –** यदि न मे, अथ कस्य प्रमादेन ?

**कृष्णः –** यस्याः सुतः प्रसूतस्त्वं, सूतस्तस्याः प्रमादतः ।

**कर्णः –** न प्रमादेन मे मातू राधायाः सूतसम्भवः ।

**कृष्णः –** शृणु कर्ण रहस्यं ते न राधा तव जन्मदा ।

**कर्णः –** जानामि तत्, तयैवासीत् बाल्ये मे कथितं पुरा
किं तेन, तयैवाहं रक्षितो वर्धितस्तथा ।

**कृष्णः –** जानीया यदि त्वं कस्याः कुक्षेः सञ्जातक्षत्रियः
निश्चितं, सूतपुत्रत्वं रोचते न क्षणाय ते ।

**कर्णः –** देवं सूर्यमुपासीनस्तेजस्वी क्षत्रियादपि,
अङ्गदेशाभिषिक्तश्च सूतत्वं न स्मराम्यहम् ।

**कृष्णः –** जनानां स्मरणं शश्वत् कर्णोऽयं सूतवंशजः
तेनैव बाध्यसे नित्यं, निराकुरु यदीच्छसि ।

**कर्णः –** राधाऽधिरथपुत्रोऽहं वर्धितो जीवितस्तथा
राधेय एव युद्धेयम् गतिं क्षत्रस्य प्राप्नुयाम् ।

[पुनरपि रणभूमिः । तौ प्रचलतः । दीर्घ निःश्वसिति कुन्ती । कोलाहलो न शान्तः । तयोर्गच्छतोः पार्श्वे, नातिदूरे श्रूयते अन्यः पदरवः कस्याश्चित् स्त्रियः । अस्फुटं सगद्गदं रुदती तयोर्विरुद्धया दिशा परिक्रमति सा पथम् ।]

**स्त्री –** हा वत्स, कुत्र त्वां पश्यामि । अद्य नागतोऽसि गृहम् । नैकस्मिन्नपि दिवसे प्रमादितां त्वया । किमभवत् । पिताऽपि ते नायातः । अहं स्वयमेव निर्गता । न जाने रणभूमिम् । किमस्ति रणम् । किं तस्य प्रयोजनम् । अजानन्ती किंचिदपि अत्रागता, किं पश्यामि, किं शृणोमि । कियन्तः पुत्रा लालिताः पालिता जननीभिस्तेषां मृदि चाश्मसु पतिता विलपन्ति निःस्तब्धा वा स्वपन्ति । स्वपन्ति ? कालनिद्रायाम् । किम् ? किम् ? केषांचित् राज्यलोभार्थम् । रे पुत्रक, अतीव बुद्धिमानपि त्वं हरिणशावक इव वागुरायामेतेषां नरमेधिनां जालेषु निपतितः

। किं राज्येन । मीनानामिव नदीषु, अश्वानामिव रथ्यासु, गोवत्सानामिव गोप्रचरेषु, विहरणं युष्माकं युनां न किं राज्यारोहणमेव ? अस्तु । ननु भोग्यैव निदैवगतिः । (स्खलिता) रुद्धा गतिः । दीपिकाऽपि नष्टा । किं करोमि । (शृणोति दूरस्थं शब्दम् ।) अयि भोः – एकाकिनी स्खलिताऽहं । भवत मे सहायाः ।

**कुन्ती –** पश्य कृष्ण । अभागिनी काचिन्मादृशा विलपति । भव सहायः ।

**कृष्णः –** यथेच्छसि । गच्छावस्तां प्रति ।

[त्वरितपदरवाः श्रूयन्ते । स्त्रियोऽन्तिक गत्वा -]

**कुन्ती –** उत्तिष्ठ भगिनि । न आहतां मन्ये ।

**स्त्री –** महान् ते उपकारः ।

**कृष्णः –** कुत्रगामिनी ?

**स्त्री –** पुत्रशोधाय । न तु जाने कुत्र गन्तव्यम् ।

**कुन्ती –** तत् कथं प्राप्स्यसे तं तमसि घने ।

**स्त्री –** प्राप्स्ये । न जाने, कथम् । प्राप्स्ये तु निश्चयेन ।

**कृष्णः –** विश्वासो मातुः । तत् किं न प्रयासि भगिन्या सह । तस्या अपि सहचरी लभ्या ।

**कुन्ती –** तथैव कुरु । अयं पथं दर्शयिता ।

**कृष्णः –** पथस्तु पूर्वमेव दर्शितः । नातिदूरं ते गन्तव्यम् । द्रक्ष्यसि रथं ग्रस्तचक्रम् । रथिनं च शरविद्धम् । इदानीं तु सहचरीं लब्ध्वा नावश्यं मे गमनं त्वया सह । अन्यत् च –

**कुन्ती –** किमन्यत् ?

**कृष्णः –** न मे तदुचितं भूयात् यदि यामिन्यां दिवारिपोः संमुखं यास्ये । प्रतिगच्छामि । रणभूमिसीमान्तिके तव कृते तिष्ठामि । आगच्छ शीघ्रम् । (प्रतिगच्छति ।)

[दूरगामिनः कृष्णस्य भारवाहिनः इव पदयोः संघाताः श्रूयन्ते ।]

**कुन्ती –** स पुरुषः । स्त्रीभिर्भिन्नं तस्य मनः । अस्तु । गच्छावः ।

**स्त्री** (विकला) **–** रे पुत्रक..

**कुन्ती –** कुतोऽस्यां प्रेतखचितभूमौ लप्स्यसे प्रत्युत्तरम् । जाने परं तु ते हृदयम् । किं स ते एक एव पुत्रः ।

**स्त्री –** द्वयं में पुत्रयोः । अयं देवेन दत्तः ।

**कुन्ती** (स्वगतप्रायम्) **–** ममापि देवदत्त एव । सूर्यदेवेन दत्तः ।

**स्त्री –** देवो ददाति । मनुष्यस्तन् निजं मन्यते ।

**कुन्ती –** पुत्रकास्तु निजाङ्गादभिन्ना, निजधृताः ।

**स्त्री –** अयि भगिनि, जननात्प्रभृत्येव स निजाधृतः, निजाङ्गात् च भिन्नो भवति । अन्य एव स आत्मनः शरीरात्।

**कुन्ती –** उरसस्तु पयोधारा निबध्नन्त्यम्बया सह ।

**स्त्री –** उरसि य आत्मनो भावा उदयन्ते, त एव भवन्ति पयोधाराः । देव-दत्तो मम सुतः । गंगाधारायां मञ्जूषैका तमानीतवती । तस्या उद्घाटने यथा हि स मया दृष्टः, प्रस्रवः सञ्जातः, प्रपात इव तस्योपरि वृष्टः ।

**कुन्ती** (उच्चस्वरेण) **–** गंगायाः? मञ्जुषायाम् ? किं तस्यान्तिके कवचमासीत् ?

**स्त्री –** वत्स एव माया दृष्टः । मञ्जुषाया उत्थाय उरसः पायितः ।

**कुन्ती –** न प्राप्तं पयसः स्वर्णपात्रम् ?

**स्त्री –** पयो दधिभूतम् । स्वर्णपात्रे का मे रुचिः – हसतीं खेलतीं स्वर्णखनिं साक्षात् लब्ध्वा ।

**कुन्ती** (मन्दस्वरे) **–** ममोदरात् खाता कदाचित् । (प्रकटम्) अपि जानासि कस्य वाऽसौ सुतः ।

**स्त्री** (खिन्नं हसति) **–** कस्य ? कस्याः? मम । यस्यार्थं येन वा अहं माता, स मम एव सुतः ।

**कुन्ती –** न हि न हि । यस्या मञ्जुषा सैव माता ।

**स्त्री –** किं मञ्जुषया । तस्य गर्भमञ्जुषाऽपि यया धृता, स्वर्णमञ्जुषायां तं प्रमुच्य मातृपदात् सा वञ्चिता ।

**कुन्ती –** किं वाऽस्मै देवदत्ताय दत् त्वया धरालोके ।

**स्त्री –** किमस्ति दातव्यं मात्रा पुत्राय – पुत्रत्वं, कुटुम्बकम् । मृदुकृतकवलैर्भोजितः, कुक्षौ निद्रायितः, बाहुभ्यां दोलायितः, नदीजलेषु स्नातः, गोवत्सैः श्वानविडालैः सह क्रीडितः, यथा तस्येष्टं तथा संवर्धितः ।

**कुन्ती –** किं नाम भवतां कुलम् ? अस्ति वा तत् तुल्यं तस्य जन्मनाकुलेन?

**स्त्री –** मनुष्यकुलम् । किं जन्मनाकुलेन ? न पश्यसि कथं कुलीनैर्धरणीयं मरणी कृता ।

**कुन्ती –** (दीर्घं निःश्वसिति ।)

[पुरतः प्रचलन्त्योस्तासां पदरवाः । अशनिपातस्य कर्णपुटाघातको गडगडाहटध्वनिः । ज्वलदशन्या द्योतितायां रणभूमौ ते अन्योन्ये परिष्वजत्याविव ‘रक्ष देव’ इत्युक्त्वा भूमितलमाश्रयेते । पुनश्च उत्तिष्ठतः ।]

**स्त्री –** पुत्रकऽ, रे पुत्रक.. ।

**कुन्ती –** अयि, दृष्टो मे स रथः । पुत्रक, त्वां मे दर्शयितुं नु नक्षत्रपातः सम्पन्नः । न-क्षत्र-पातः; नहि नहि न-क्षत्रेति मतस्य क्षत्रस्य पांतः । भगिनि, गच्छामि । प्राप्ताऽहं मे पुत्राय । त्वामपि प्रापयतु देवः पुत्रान्तिके ।

[कुन्ती त्वरया रथं प्रति प्रचलति ।]

**स्त्री –** पुत्रक, किं न मां प्रतिवक्षि ? कदा कुत्र वा त्वां पश्येयम् ? अनुसरामि तामेव मम सहायिनीं भाग्यवतीमभागिनीम् । (कतिपयपदानि चलति ।)

**कुन्ती –** ग्रस्तचक्रो रथः । शरविद्धश्च रथी । पुत्रक, आगतेयं ते माता । यथा पूर्वमेकदा आगताऽऽसम् । निशायामेव । तदेव निटिले लिखितम् । न दैवेन । दैवेन तु कन्या एव माता साकारिता । कुलधर्मेण तु बलादिव प्रवर्तिता त्वामनाकर्तुम्, अप्रकटितुम् । न मानमहत्सु कुलेषु कानीनपुत्रा मान्याः । मान्या निर्बीजपत्युः कृते नियोगेन सम्पादिताः पुत्राः । न स्त्रियः कस्याश्चित्, कन्यायाः, बालायाः, जायाया मातुर्वा मनोभावाश्चिन्तनीयाः सन्ति कुलधर्मपालकैर्जगच्चालकैः पुरुषैः । तेनैवासीर्मया वियोजितः, कुलीनैरवमानितः अर्धमचारिभिः समायुक्तः । समाप्तं ते आयुः, समाप्ता न तु कुलधर्माः सनातनास्तव कन्यामातरमभिभाविनः । न ते मां क्षमेरन्, न याचिष्येऽपि क्षमां तेषाम् । तव तु याचनायैवात्र संप्राप्ता । क्षमस्व पुत्रक, क्षमस्व ते मातरम् । (गद्गदं निर्मुच्य तूष्मींभवति ।)

**स्त्री** (रथचक्रसमीपम्) **–** पुत्रकऽ, रे पुत्रक..

**कर्णः –** (क्षीणं, सनिःश्वासम्) – राधे ..

**स्त्री –** पुत्रक, माऽश्रमः, समीपमायामि । (प्रबलोत्साहयुता कर्णं प्रति गन्तुमारभते ।)

**कुन्ती** (चकिता) **–** स जीवति ? (कर्णस्य समीपे आस्ते ।)

**स्त्री** (हस्तयोः कर्णमस्तकं गृहीत्वा, कर्णमुखसमीपे श्रवणमानीय) **–** ब्रूहि पुत्रक..

**कर्णः –** राधे.. अङ्के.. कृष्ण.. आह्वयत्.. राधेय.. (राधा अङ्कं ददाति ।)

**कुन्ती** (साश्चर्यम्) **–** त्वं राधा ?

**राधा** (तां निवारयितुम्) **–** शृणु ..

**कर्णः –** राधे.. सूर्ये.. निलीये.. (मूर्च्छनायां गच्छति ।)

**कुन्ती –** किमवोचत् ?

**राधा –** ‘राधे मां अङ्के धारय । कृष्णो मां आह्वयत् राधेय इति । राधे, नेत्रे उन्मील्य उदयति सूर्ये निलीये ।’

**कुन्ती –** अतः किम् ।

**राधा –** महती मूर्च्छना तस्य । सूर्योदयं यावतं तु जीवितं ‘धारयिष्यति । तदहं तमङ्के सुप्तं धारयामि । सूर्योदये नेत्रे उन्मील्य निजदेवतायामात्मानं विमुञ्चति । शीर्षं भूमौ स्थापयित्वा, युद्धारंभपूर्वं निर्गच्छामि ।

**कुन्ती –** राधे, अहमस्य जननी नाभिनालबन्धनात् । त्वया प्राप्ता मञ्जुषा मयैव प्रवाहयिता । निशायाम् । कस्यापि अदृष्ट्या । कुलीना भूत्वा तदेव मे भागधेयमद्यापि । नाहं द्रष्टव्या केनचित् रणभूमौ रात्रावपि, किं दिने । त्वं भाग्यवती । अकुलीना भविष्यसि तस्य सद्गतेः साक्षिणी । तवैव पुत्रः । त्वमेव माता ।

[रणात् निवर्तमानायाः कुन्त्याः पदाहतिः तस्याः सगद्गदनिःश्वसितं रुदनं च श्रूयन्ते ।]

**विश्वनाथ खैरे – मराठी साहित्यम् ।**

**नाटकानि ।**

| | |
|---|---|
| विदुषां परितोषकम् – | *** एकलव्य** |
| कुरुवंशीयस्त्रीणां भावकल्लोलाः | **('वंशस्य व्यासः ।') वंशाचा व्यास** |
| विज्ञाननाटकम् | **युरेका** |
| शिवकालीनाया लोककथाया एकनाट्यम् | **हिरकनी** |
| पुराणकथानां विमर्शस्य नाटिका | **('अश्वसंमुखं गीता ।') घोड्यापुढं गीता** |

**बालसाहित्यम्** प्रौढभूमिकाभिः समेतम् ।

| | |
|---|---|
| विज्ञानयुगस्य बालगीतानि | **युगाणी** |
| निरक्षराणां सुलभसाक्षरणम् | **अक्षरे** |
| संस्कृतिसंगमस्य बालगीतानि (आंग्लभाषाया मराठी) | **इमराठी गाणी** |

**भाषा-संस्कृति-संशोधनम् ।**

| | |
|---|---|
| मराठीस्थलनामानां दक्षिणीभाषात उपपत्तिः | **द्रविड महाराष्ट्र** |
| 'भारतीय' भाषाशास्त्रम् | **('मराठी भाषाया मूलम्') मराठी भाषेचे मूळ** |
| दक्षिणी-मराठी-भाषासंबंधः | ***अडगुलं मडगुलं** |
| संस्कृतिकथानां अनेकवित् शोधः | ******भारतीय मिथ्यांचा मागोवा** |
| चमत्कारकथानां उद्गमस्य शोधः | **ज्ञानेश्वरांचे चमत्कार** |
| वेदसूक्तानां मराठी-अनुवादः | **वेदातली गाणी** |
| आशयलक्षिणी समीक्षा | **साहित्य मिथ्य माहित्य** |

*** राज्य तथा इतरे साहित्यपुरस्काराः ।**

संमत प्रकाशन, ३७४ सिंध सोसायटी, औंध पुणे ४११००७

**विश्वनाथ खैरे**
मूर्धन्यः बी ई (सिव्हिल) पुणे १९५१

केन्द्रीयलोकनिर्माणविभागे
काश्मीरे जवाहरसुरंगा, नेपाले सिद्धार्थ राजमार्गः
दिल्ली-यमनयोः नगरविकासः, इत्यादिनिर्माणेषु नेता,
मुख्यः अभियन्ता निवृतः ।
अभिनवानां नाट्यकृतीनां, विज्ञानगीतानां च लेखकः ।
संस्कृत-मराठी-तमिळ ('संमत') अभेदतः भाषाणां
'भारतीय' कुलस्य, नवीनाया भारतविद्यायाश्च प्रतिपादकाः ।
भारतीयपुराणकथानां अनेकविदध्ययनेन संशोधितायाः
आकलनपद्धतेः उद्‌बोधकः ।

**आगामि**

**नवपुराणम् ।**

**नवं च पुराणं च ।**
**संस्कृतवृत्त्या आंग्लानुवादेन च युक्तम् ।**
**महाकाव्य-पुराण-गतानां आख्यानानां सरणिमनुसरत्**
**तेषां आशयानां, मूल-मिथ्यानां आकलनं सुलभीकुर्वत्**
**मोक्षमूलर-नवखण्डशोध-शुक्राम्बिकाव्रत-काकपिक-**
**मधुगन्धर्वी-ओकासुर-सहोदराहमिका इत्यादिभिः**
**नवीनैः, नवमितैः आख्यानैः समाहृतं**
**नवीन-भारतविद्यायाः पथदर्शकम् ।**